
श्रीः

# श्री लक्ष्मीनृसिंह परब्रह्मणे नमः





# नित्य पारायण स्तोत्राणि





# स्तोत्रमालिका

**(The list is Hyperlinked to the text)**


श्रीवेङ्कटेशसुप्रभातं

श्रीवेङ्कटेशस्तोत्रं

श्रीवेङ्कटेशप्रपत्ति

श्रीवेङ्कटेशमङ्गळाशाशनं

श्रीविष्णुसहस्रनामस्तोत्रं

श्रीलक्ष्म्यष्टोत्तरशतनामस्तोत्रं

श्रीमहालक्ष्म्यष्टकं

श्रीहयग्रीवस्तोत्रं

दशावतारस्तोत्रं

न्यास दशकं

विघ्नेश्वरप्रार्थना

सरस्वतीप्रार्थना

वाल्मीकीप्रार्थना

श्रीआञ्जनेयस्तोत्रं

पंचायुधस्तोत्रं

द्वादशनामपंजरं

श्रीनृसिंहाष्टोत्तरशतनामस्तोत्रं

श्रीकृष्णाष्टकं

श्रीसुदर्शनाष्टकं

दशावतारश्लोकं

शरणागतिगद्यं

सात्विकत्यागं

कर्पूरदीपआरति



# ACKNOWLEDGMENTS

Web Pages

(www.tripod.lycos.com)

Document Prepared using
Baraha multilanguage free software

(www.baraha.com)

Please forward suggestions/comments
to
trchari@yahoo.com



# ॐ

# स्तोत्रमालिका

ओं

श्री लक्ष्मीनृसिंह परब्रह्मणे नमः

श्रीपद्मावतीसमेत श्रीवेङ्कटेशाय नमः

श्री विष्णवे परमात्मने नमः

श्रीमते रामानुजाय नमः

श्री निगमान्त महादेशिकाय नमः

ओं श्री सायिरां

ओं अस्मद् गुरुभ्यो नमः।

अस्मद् परम गुरुभ्यो नमः।

अस्मद् सर्वगुरुभ्यो नमः।

श्रीमते श्री आदिवण् शठकोप यतींद्र महादेशिकाय नमः।

यस्याभवद्भक्त जनार्तिहन्तुः पितृत्व मन्येष्वविचार्यतूर्णं।
स्तंभेवतार स्तमनन्यलभ्यं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किक केसरी।
वेदान्ताचार्यवर्योमे सन्निधत्तां सदाहृदि॥

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाक मधीमहे।
वृणीमहेच तत्राद्यौ दंपती जगतांपती॥

श्रीमन्नभीष्ट वरद ।
त्वामस्मि शरणं गतः॥

स्वशेषभूतेनमया स्वीयैः सर्वपरिच्छदैः।
विधातुंप्रीतमात्मानं देवः प्रक्रमतेस्वयं॥



# श्री वेङ्कटेश सुप्रभातं, स्तोत्रं, प्रपत्ति, मंगळाशाशनं

# श्री वेङ्कटेश सुप्रभातं

कौसल्या सुप्रजा राम पूर्वासन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकं [1]

**कौसल्या सुप्रजा.......**

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गळं कुरु [2]

**उत्तिष्ठोत्तिष्ठ..............**

मातस्समस्त जगतांमधुकैटभारेः
वक्षोविहारिणि मनोहर दिव्यमूर्ते ।
श्रीस्वामिनि श्रितजनप्रियदानशीले
श्रीवेङ्कटेश दयिते तव सुप्रभातं [3]

**मातस्समस्त...............**

तव सुप्रभातमरविन्दलोचने
भवतु प्रसन्नमुखचन्द्रमण्डले ।
विधिशङ्करेन्द्र वनिताभिरर्चिते
वृषशैलनाथ दयिते दयानिधे [4]

अत्र्यादि सप्तऋषयस्समुपास्य सन्ध्यां
आकाश सिन्धु कमलानि मनोहराणि ॥
आदायपाद युगमर्चयितुं प्रपन्नाः
शेषाद्रिशेखर विभो तव सुप्रभातं [5]

पञ्चाननाब्जभवषण्मुखवासवाद्याः
त्रैविक्रमादिचरितं विबुधाः स्तुवन्ति ।
भाषा पतिः पठति वासर शुद्धिमारात्
शेषाद्रिशेखरविभो तव सुप्रभातं [6]

ईषत्प्रपुल्लसरसीरुहनारिकेळ
पूगद्रुमादिसुमनोहरपालिकानां ।
आवाति मन्दमनिलस्सह दिव्यगन्धैः
शेषाद्रिशेखरविभो तव सुप्रभातं [7]

उन्मील्य नेत्रयुगमुत्तमपञ्जरस्थाः
पात्रावशिष्टकदळीफलपायसानि ।
भुक्त्वासलीलमथकेळिशुकाःपठन्ति
शेषाद्रि शेखरविभो तव सुप्रभातं [8]

तन्त्रीप्रकर्षमधुरस्वनया विपञ्च्या
गायत्यनन्तचरितं तव नारदोऽपि ।
भाषासमग्रमसकृत्करचाररम्यं
शेषाद्रिशेखरविभो तव सुप्रभातं [9]

भृङ्गावळी च मकरन्दरसानुविद्ध –
झङ्कारगीतनिनदैस्सह सेवनाय ।
निर्यात्युपान्तसरसीकमलोदरेभयः
शेषाद्रिशेखरविभो तव सुप्रभातं [10]

योषागणेन वरदध्नि विमथ्यमाने
घोषालयेषु दधिमन्थनतीव्रघोषाः ।
रोषात्कलिं विदधते ककुभश्च कुंभाः
शेषाद्रिशेखरविभो तव सुप्रभातं [11]

पद्मेशमित्रशतपत्रगतालिवर्गाः
हर्तुंश्रियं कुवलयस्य नियाङ्गलक्ष्मा।
भेरीनिनादमिव बिभ्रति तीव्रनादं
शेषाद्रिशेखरविभो तव सुप्रभातं [12]

श्रीमन्नभीष्टवरदाखिललोकबन्धो
श्रीश्रीनिवास जगदेकदयैकसिन्धो ।
श्रीदेवतागृहभुजान्तरदिव्यमूर्ते
श्रीवेङ्कटाचलपते तव सुप्रभातं [13]

श्रीमन्नभीष्ट ............

श्रीस्वामिपुष्करिणिकाऽऽप्लवनिर्मलाङ्गाः
श्रेयोऽर्थिनो हरविरिञ्चसनन्दनाद्याः।
द्वारे वसन्ति वरवेत्रहतोत्तमाङ्गाः
श्रीवेङ्कटाचलपते तव सुप्रभातं [14]

श्रीशेषशैलगरुडाचलवेङ्कटाद्रि –
नारायणाद्रिवृषभाद्रिवृषाद्रिमुख्यां।
आख्यां त्वदीयवसतेरनिशं वदन्ति
श्रीवेङ्कटाचलपते तव सुप्रभातं [15]

सेवापराश्शिवसुरेशकृशानुधर्म –
रक्षोऽम्बुनाथपवमानधनाधिनाथाः ।
बद्धाञ्जलिप्रविलसन्निजशीर्षदेशाः
श्रीवेङ्कटाचलपते तव सुप्रभातं [16]

धाटीषु ते विहगराजमृगाधिराज –
नागाधिराजगजराजहयाधिराजाः ।
स्वस्वाधिकारमहिमाधिकमर्थयन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातं [17]

सूर्येन्दुभौमबुधवाक्पतिकाव्यसौरि –
स्वर्भानुकेतुदिविषत्परिषत्प्रधानाः ।
त्वद्दासदासचरमावधिदासदासाः
श्रीवेङ्कटाचलपते तव सुप्रभातं [18]

त्वत्पादधूळिभरितस्फुरितोत्तमाङ्गाः
स्वर्गापवर्गनिरपेक्षनिजान्तरङ्गाः ।
कल्पागमाकलनयाऽऽकुलतां लभन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातं [19]

त्वद्गोपुराग्रशिखराणि निरीक्षमाणाः
स्वर्गापवर्गपदवीं परमां श्रयन्तः ।
मर्त्यामनुष्यभुवने मतिमाश्रयन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातं [20]

श्रीभूमिनायक दयादि गुणामृताब्धे
देवाधिदेव जगदेकशरण्यमूर्ते ।
श्रीमन्ननन्तगरुडादिभिरर्चिताङ्घ्रे
श्रीवेङ्कटाचलपते तव सुप्रभातं [21]

श्रीपद्मनाभ पुरुषोत्तम वासुदेव
वैकुण्ठ माधव जनार्दन चक्रपाणे ।
श्रीवत्सचिह्न शरणागतपारिजात
श्रीवेङ्कटाचलपते तव सुप्रभातं [22]

कन्दर्पदर्पहरसुन्दरदिव्यमूर्ते
कान्ताकुचाम्बुरुहकुट्मललोलदृष्टे ।
कल्याणनिर्मलगुणाकरदिव्यकीर्ते
श्रीवेङ्कटाचलपते तव सुप्रभातं [23]

मीनाकृते कमठ कोल नृसिंह वर्णिन्
स्वामिन्  परश्वथतपोधन रामचन्द्र ।
शेषांशराम यदुनन्दन कल्किरूप
श्रीवेङ्कटाचलपते तव सुप्रभातं [24]

एलालवङ्गघनसारसुगन्धितीर्थं दिव्यं
वियत्सरिति हेमघटेषु पूर्णं ।
धृत्वाऽद्य वैदिकशिखामणयः प्रहृष्टाः
तिष्ठन्ति वेङ्कटपते तव सुप्रभातं [25]

भास्वानुदेति विकचानि सरोरुहाणि
संपूरयन्ति निनदैः ककुभो विहङ्गाः।
श्रीवैष्णवास्सततमर्थितमङ्गलास्ते
धामाश्रयन्तितववेङ्कटसुप्रभातं [26]

ब्रह्मादयस्सुरवरास्समहर्षयस्ते
सन्तस्सनन्दनमुखास्तव योगिवर्याः ।
धामान्तिके तव हि मङ्गळवस्तुहस्ताः
श्रीवेङ्कटाचलपते तव सुप्रभातं [27]

लक्ष्मीनिवास निरवद्यगुणैकसिन्धो
संसारसागरसमुत्तरणैकसेतो ।
वेदान्तवेद्यनिजवैभ भक्तभोग्य
श्रीवेङ्कटाचलपते तव सुप्रभातं [28]

लक्ष्मीनिवास ............

इत्थं वृषाचलपतेरिह सुप्रभातं
येमानवाः प्रतिदिनं पठितुं प्रवृत्ताः ।
तेषां प्रभातसमयेस्मृतिरङ्गभाजां
प्रज्ञां परार्थसुलभां परमांप्रसूते [29]



# श्री वेङ्कटेश स्तोत्रं

कमलाकुचचूचुककुङ्कमतो नियतारुणितातुलनीलतनो ।
कमलायतलोचन लोकपते विजयीभव वेङ्कटशैलपते [1]

**कमलाकुचचू..........**

सचतुर्मुखषण्मुखपञ्चमुख प्रमुखाखिलदैवतमौळिमणे ।
शरणागतवत्सल सारनिधे परिपालय मां वृषशैलपते [2]

अतिवेलतया तव दुर्विषहै रनुवेलकृतैरपराधशतैः ।
भरितंत्वरितं वृषशैलपते परयाकृपया परिपाहि हरे [3]

अधिवेङ्कटशैलमुदारमतेर्जनताभिमताधिकदानरतात् ।
परदेवतया गदितान्निगमैः कमलादयितान्नपरं कलये [4]

कलवेणुरवावशगोपवधूशतकोटिवृतात्स्मरकोटिसमात् ।
प्रतिवल्लविकाभिमतात्सुखदात्वसुदेवसुतान्न परं कलये [5]

अभिरामगुणाकर दाशरथे जगदेकधनुर्धर धीरमते ।
रघुनायक राम रमेशविभो वरदो भव देव दयाजलधे [6]

अवनीतनयाकमनीयकरं रजनीकरचारुमुखाम्बुरुहं ।
रजनीचरराज तमोमिहरं महनीयमहं रघुराममये [7]

सुमुखं सुहृदं सुलभं सुखदं स्वनुजंच सुकायममोघशरं ।
अपहायरघूद्वहमन्यमहं नकथञ्चन कञ्चन जातुभजे [8]

विना वेङ्कटेशं न नाथो न नाथः
सदा वेङ्कटेशं स्मरामि स्मरामि ।
हरे वेङ्कटेश प्रसीद प्रसीद
प्रियं वेङ्कटेश प्रयच्छ प्रयच्छ [9]

**विना वेङ्कटेशं ...........**

अहं दूरतस्ते पदाम्भोजयुग्म
प्रणामेच्छयाऽऽगत्य सेवां करोमि ।
सकृत्सेवया नित्यसेवाफलं त्वं
प्रयच्छ प्रयच्छ प्रभो वेङ्कटेश [10]

अज्ञानिना मया दोषान् अशेषान्विहितान् हरे ।
क्षमस्व त्वं क्षमस्व त्वं शेषशैल शिखामणे [11]

**अज्ञानिना मया ............**

* * * * *





# श्री वेङ्कटेश प्रपत्ति

# श्री वेङ्कटेश प्रपत्ति

ईशानां जगतोऽस्य वेङ्कटपतेर्विष्णोः परां प्रेयसीं ।
तद्वक्षःस्थलनित्यवास रसिकां तत्क्षान्तिसंवर्धिनीं ॥
पद्मालङ्कृत पाणिपल्लवयुगां पद्मासनस्थां श्रियं ।
वात्सल्यादि गुणोज्ज्वलां भगवतीं वन्दे जगन्मातरं [1]

**ईशानां जगतोऽस्य ...........**

श्रीमन् ! कृपाजलनिधे! कृतसर्वलोक!
सर्वज्ञ! शक्त! नतवत्सल! सर्वशेषिन् ।
स्वामिन् ! सुशीलसुलभाश्रितपारिजात!
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [2]

**श्रीमन् !...................**

आनूपुरार्पितसुजातसुगन्धिपुष्प
सौरभ्यसौरभकरौ समसन्निवेशौ ।
सौम्यौसदाऽनुभवनेऽपि नवानुभाव्यौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [3]

सद्योविकासिसमुदित्वरसान्द्रराग _
सौरभ्यनिर्भरसरोरुहसाम्यवार्तां ।
सम्यक्षु साहसपदेषु विलेखयन्तौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [4]

रेखामयध्वजसुधाकलशातपत्र –
वज्राङ्कुशाम्बुरुहकल्पकशङ्खचक्रैः ।
भव्यैरलङ्कृततलौ परतत्वचिह्नैः
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [5]

ताम्रोदरद्युतिपराजितपद्मरागौ
बाह्यैर्महोभिरभिभूतमहेन्द्रनीलौ ।
उद्यन्नखांशुभिरुदस्तशशाङ्कभासौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [6]

सप्रेमभीति कमलाकरपल्लवाभ्यां
संवाहनेऽपि सपदि क्लममादधानौ ।
कान्तावावाङ्मनसगोचरसौकुमार्यौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [7]

लक्ष्मीमहीतदनुरूपनिजानुभाव –
नीलादिदिव्यमहिषीकरपल्लवानां ।
आरुण्यसङ्क्रमणतः किल सान्द्ररागौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [8]

नित्यानमद्विधिशिवादिकिरीटकोटि –
प्रत्युप्तदीप्तनवरत्नमहःप्ररोहैः ।
नीराजनाविधिमुदारमुपाददानौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [9]

"विष्णोः पदे परम" इत्युदितप्रशंसौ ।
यौ "मध्व उत्स" इति भोग्यतयाऽप्युपात्तौ ।
भूयस्तथेति तव पाणितलप्रदिष्टौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [10]

पार्थाय तत्सदृशसारथिना त्वयैव
यौ दर्शितौ स्वचरणौ शरणं व्रजेति।
भूयोऽपि मह्यमिहतौ करदर्शितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [11]

मन्मूर्ध्नि काळियफणे विकटाटवीषु
श्रीवेङ्कटाद्रिशिखरे शिरसि श्रुतीनां ।
चित्तेऽप्यनन्यमनसां सममाहितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [12]

अम्लानहृष्यदवनीतलकीर्णपुष्पौ
श्रीवेङ्कटाद्रिशिखराभरणायमानौ ।
आनन्दिताखिलमनोनयनौ तवैतौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [13]

प्रायः प्रपन्नजनताप्रथमावगाह्यौ
मातुस्स्तनाविवशिशोरमृतायमानौ।
प्राप्तौ परस्परतुलामतुलान्तरौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [14]

सत्वोत्तरैस्सततसेव्यपदाम्बुजेन
संसारतारकदयार्द्रदृगञ्चलेन ।
सौम्यौपयन्तृमुनिना ममदर्शितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये [15]

श्रीशश्रियाघटिकया त्वदुपाय भावे ।
प्राप्ये त्वयि स्वयमुपेय तया स्फुरन्त्या ॥
नित्याश्रिताय निरवद्यगुणाय तुभ्यं ।
स्यां किङ्करो वृषगिरीश नजातु मह्यं [16]

**श्रीश श्रिया ...............**



# श्री वेङ्कटेश मङ्गळाशासनं

श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनां ।
श्री वेङ्कटनिवासायश्रीनिवासाय मङ्गळं [1]

श्रियः कान्ताय................

लक्ष्मीसविभ्रमालोकसुभ्रूविभ्रमचक्षुषे।
चक्षुषे सर्वलोकानांवेङ्कटेशाय मङ्गळं [2]

श्रीवेङ्कटाद्रि शृङ्गाग्र मङ्गळा भरणाङ्घ्रये ।
मङ्गळानां निवासायश्रीनिवासाय मङ्गळं [3]

सर्वावयवसौन्दर्यसंपदा सर्वचेतसां ।
सदा संमोहनायास्तु वेङ्कटेशाय मङ्गळं [4]

नित्यायनिरवद्याय सत्यानन्द चिदात्मने ।
सर्वान्तरात्मने श्रीमद्वेङ्कटेशाय मङ्गळं [5]

स्वतस्सर्वविदे सर्वशक्तये सर्वशेषिणे ।
सुलभाय सुशीलाय वेङ्कटेशाय मङ्गळं [6]

परस्मै ब्रह्मणे पूर्णकामाय परमात्मने ।
प्रयुञ्जे परतत्वाय वेङ्कटेशाय मङ्गळं [7]

आकालतत्वमश्रान्तमात्मना मनुपश्यतां।
अतृप्त्यमृतरूपाय वेङ्कटेशाय मङ्गळं [8]

प्रायः स्वचरणौ पुंसां शरण्यत्वेन पाणिना ।
कृपया दिशते श्रीमद्वेङ्कटेशाय मङ्गळं [9]

दयाऽमृततरङ्गिण्यास्तरङ्गैरिव शीतलैः ।
अपाङ्गैः सिञ्चते विश्वं वेङ्कटेशाय मङ्गळं [10]

स्रग्भूषाम्बरहेतीनां सुषमावह मूर्तये ।
सर्वार्तिशमनायास्तु वेङ्कटेशाय मङ्गळं [11]

श्री वैकुण्ठविरक्ताय स्वामिपुष्करणी तटे ।
रमया रममाणाय वेङ्कटेशाय मङ्गळं [12]

श्री वैकुण्ठविरक्ताय.........

श्रीमत्सुन्दरजामातृमुनिमानस वासिने ।
सर्वलोकनिवासाय श्रीनिवासायमङ्गळं[13]

मङ्गळाशासनपरैर्मदाचार्यपुरोगमैः ।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गळं [14]





# श्री विष्णु सहस्रनाम स्तोत्रं

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये [1]

यस्य द्विरद वक्त्राद्याः पारिषद्याःपरश्शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये [2]

व्यासं वसिष्ठ नप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातंतपोनिधिम् [3]

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्म निधये वासिष्ठाय नमो नमः [4]

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैक रूप रूपाय विष्णवे सर्वजिष्णवे [5]

यस्य स्मरण मात्रेण जन्म संसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे [6]

.. ओं नमो विष्णवे प्रभविष्णवे ..

## श्री वैशंपायन उवाच

श्रुत्वाधर्मानशेषेण पावनानिचसर्वशः।
युधिष्ठिरःशान्तनवं पुनरेवाभ्य भाषत [1]

## युधिष्ठिर उवाच

किमेकं दैवतं लोके किंवाप्येकं परायणम् ।
स्तुवन्तःकं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् [2]

को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किंजपं मुच्यते जन्तुर्जन्म संसारबन्धनात् [3]

## श्री भीष्म उवाच

जगत्प्रभुं देवेदेवमनन्तं पुरुषोत्तमं ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः [4]

तमेव चार्चयन्नित्यं भक्त्या पुरुष मव्ययम् ।
ध्यायन् स्तुवन्न मस्यंश्च  यजमानस्तमेव च [5]

अनादिनिधनं विष्णुं सर्वलोक महेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् [6]

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् [7]

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा [8]

परमं यो मयत्तेजः परमंयो महत्तपः ।
परमं यो महद्ब्रह्म परमंयःपरायणम्[9]

पवित्राणां पवित्रं यो मङ्गळानां च मङ्गळम् ।
दैवतं देवतानांच भूतानां योऽव्ययः पिता [10]

यतः सर्वाणि भूतानि भवन्त्यादि युगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये [11]

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणुपाप भयापहम् [12]

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये [13]

ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः ।
छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः [14]

अमृतां शूद्भवो बीजं शक्तिर्देवकी नन्दनः ।
त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते [15]

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ।
अनेकरूप दैत्यान्तं नमामि पुरुषोत्तमम् [16]

अस्य श्री विष्णोर्दिव्य सहस्रनाम स्तोत्र महामन्त्रस्य ।
श्रीवेदव्यासो भगवान् ऋषिः ।
अनुष्टुप् छन्दः ।
श्री महा विष्नुः परमात्मा श्रीमन्नारायणो देवता ।
अमृतांशूद्भवो भानुरितिबीजम् ।
देवकी नन्दनः स्रष्टेतिशक्तिः ।
उद्भवः क्षोभणो देव इति परमो मन्त्रः ।
शङ्खभृन्नन्दकी चक्रीति कीलकं ।
शार्ङ्ग धन्वा गदाधर इत्यस्त्रं ।
रथाङ्ग पाणि रक्षोभ्य इति नेत्रं ।
त्रिसामा सामगः सामेति कवचम्।
आनन्दं परब्रह्मेति योनिः ।
ऋतुः सुदर्शनः काल इति दिग्बन्धः ।
श्रीविश्वरूप इति ध्यानम् ।
श्रीमहाविष्णु प्रीत्यर्थे सहस्रनामजपे विनियोगः ॥

## ध्यानम्

क्षीरोधन्वत्प्रदेशे शुचिमणिविलसत्सैकते मौक्तिकानाम् ।
मालाक्लृप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः ।

शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्त पीयूष वर्षैः ।
आनन्दी नः पुनीया दरिनलिनगदा शङ्खपाणिर्मुकुन्दः ।
भूःपादौ यस्यनाभिर्वियदसुरनिल श्चन्द्रसूर्यौच नेत्रे।
कर्णावाशाः शिरोद्यौर्मुखमपिदहनो यस्यवास्तेय मब्धिः।
अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैः ।
चित्रं रंरम्यतेतं त्रिभुवनवपुषं विष्णुमीशं नमामि।

शान्ताकारं भुजगशयनं पद्मनाभंसुरेशं ।
विश्वाकारं गगनसदृशं मेघवर्णं शुभाङ्गं ॥
लक्ष्मीकान्तं कमलनयनं योगि हृध्यान गम्यं ।
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

मेघश्यामं पीत कौशेयवासं ।
श्रीवत्साङ्कं कौस्तुबोद्भासिताङ्गम् ॥
पुण्योपेतं पुण्डरीकायताक्षं ।
विष्णुं वन्दे सर्वलोकैकनाथम् ॥

सशङ्ख चक्रं सकिरीट कुण्डलं
सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षः स्थलशोभिकौस्तुभं
नमामि विष्णुं शिरसा चतुर्भुजम्॥

छायायां पारिजातस्य हेम सिंहासनोपरि ।
आसीनमम्बुदश्याम मायताक्षमलं कृतं ॥
चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कित वक्षसं ।
रुक्मिणी सत्यभामाभ्यां सहितं कृष्णमाश्रये ॥

## ---नाम सहस्रः प्रारम्भः ---

## .. हरिः ओं ..

विश्वं विष्णुर्वषट्कारो  भूतभव्य भवत्प्रभुः ।
भूतकृद् भूत भृद्भावो भूतात्मा भूतभावनः [1]

पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षरएव च [2]

योगो योगविदां नेता प्रधान पुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः [3]

सर्वश्शर्वश्शिवस्स्थाणुर्भूतादिर्निधिर व्ययः ।
सम्भवो भावनो भर्ता प्रभवःप्रभुरीश्वरः [4]

स्वयंभूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाताधातुरुत्तमः [5]

अप्रमेयो हृषीकेशः पद्मनाभोऽमर प्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरोध्रुवः [6]

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूत स्त्रिककुब्धाम पवित्रं मङ्गळं परम् [7]

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः [8]

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् [9]

सुरेशः शरणं शर्म  विश्वरेताः प्रजा भवः ।
अहस्संत्सरो व्याळः  प्रत्ययस्सर्वदर्शनः [10]

अजस्सर्वेश्वरस्सिद्धः  सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिस्सृतः [11]

वसुर्वसुमनास्सत्य स्समात्मा संमितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः [12]

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वत स्थाणुर्वरारोहो महातपाः [13]

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः [14]

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृता कृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्र श्चतुर्भुजः [15]

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर् जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः [16]

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः [17]

वेद्यो वैद्यःसदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः [18]

महाबुद्धिर्महावीर्यो महाशक्ति र्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृत् [19]

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः [20]

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः [21]

अमृत्युः सर्वधृक् सिंहः संधाता सन्धिमान् स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा [22]

गुरुर्गुरुतमो धामः सत्य सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः [23]

अग्रणीर् ग्रामणीः श्रीमान्न्यायोनेता समीरणः ।
सहस्र मूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् [24]

आवर्तनो निवृत्तात्मा संवृतः सं प्रमर्दनः ।
अहःसंवर्तको वह्निरनिलो धरणीधरः [25]

सुप्रसादः प्रसन्नात्मा विश्व शृग् विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः  साधुर्जह्नु र्नारायणो नरः [26]

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्ध संकल्पः सिद्धिदःसिद्धिसाधनः [27]

वृषाही वृषभो विष्णुर्वृषपर्वावृषोदरः ।
वर्धनो वर्धमानश्च विविक्तःश्रुतिसागरः [28]

सुभुजो दुर्धरो वाग्मी महेन्द्रोवसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टःप्रकाशनः [29]

ओजस्तेजोद्युतिधरः प्रकाशात्माप्रतापनः ।
ऋद्ध स्स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः [30]

अमृतांशूद्भवो भानुः शशबिन्दुःसुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः [31]

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः [32]

युगादिकृद्युगावर्तो नैकमायोमहाशनः ।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित् [33]

इष्टो विशिष्टः शिष्टेष्टः शिखण्डीनहुषोवृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः [34]

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपान्निधिर धिष्ठान मप्रमत्तः प्रतिष्ठितः [35]

स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानु रादिदेवः पुरन्दरः [36]

अशोकस्तारणस्तारः शूरःशौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः [37]

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीर भृत् ।
महर्धिरृद्धो वृद्धात्मा महाक्षो गरुडध्वजः [38]

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः [39]

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः [40]

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः [41]

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्धिः परम स्पष्ट स्तुष्टः पुष्टः शुभेक्षणः [42]

रामो विरामो विरजो मार्गो नेयोनयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मोधर्मविदुत्तमः [43]

वैकुण्ठः पुरुषः प्राणः प्राणदःप्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तोवायुरधोक्षजः [44]

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः [45]

विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः [46]

अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमःक्षामः समीहनः [47]

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञोज्ञानमुत्तमम् [48]

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः [49]

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः [50]

धर्मगुब्धर्मकृद्धर्मी सदसत्ऽक्षरमक्षरम् ।
अविज्ञाता सहस्त्रांशुर्विधाता कृतलक्षणः [51]

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः [52]

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः [53]

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसंधो दाशार्हः सात्वतांपतिः [54]

जीवो विनयिता साक्षी मुकुन्दोऽमित विक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः [55]

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः [56]

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् [57]

महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः [58]

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः [59]

भगवान् भगहानन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः [60]

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिविस्पृक् सर्वदृग्वासो वाचस्पतिरयोनिजः [61]

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।
सन्न्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् [62]

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः [63]

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः [64]

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः श्रीमान्लोकत्रयाश्रयः [65]

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योति र्गणेश्वरः ।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः [66]

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः [67]

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः [68]

कालनेमिनिहा वीरः शौरिः शूर जनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहाहरिः [69]

कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णु र्वीरोऽनन्तो धनंजयः [70]

ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद् ब्राह्मणोब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः[71]

महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः [72]

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः [73]

मनोजवस्तीर्थकरो वसुरेतावसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमनाहविः [74]

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः [75]

भूतावासो वासुदेवः सर्वासु निलयोऽनलः ।
दर्पहा दर्पदोऽदृप्तो दुर्धरोऽथापराजितः [76]

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिःशताननः [77]

एको नैकः सवः कः किं यत् तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः [78]

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः [79]

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः [80]

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतांवरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गोगदाग्रजः [81]

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् [82]

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा [83]

शुभाङ्गो लोकसारङ्गः सुतन्तु स्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः [84]

उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी [85]

सुवर्णबिन्दुरक्षोभ्यः सर्व वागीश्वरेश्वरः ।
महाहृदो महागर्तो महाभूतो महानिधिः [86]

कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृतांशोऽमृत वपुः सर्वज्ञः सर्वतोमुखः [87]

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोऽदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः [88]

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः [89]

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः [90]

भारभृत् कथितो योगी योगीशःसर्वकामदः ।
आश्रमः श्रमणःक्षामः सुपर्णो वायुवाहनः [91]

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्तानियमो यमः [92]

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्म परायणः ।
अभिप्रायःप्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः [93]

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः [94]

अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकधिष्ठानमद्भुतः [95]

सनात्सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः [96]

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः [97]

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः [98]

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः [99]

अननन्तरूपोऽनन्तश्रीर्जितमन्युर्भया पहः ।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः [100]

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः [101]

आधारनिलयो धाता पुष्पहासःप्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदःप्रणवः पणः [102]

प्रमाणंप्राणनिलयः प्राणभृत्प्राण जीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः [103]

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः [104]

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद् यज्ञगुह्यमन्नमन्नाद एव च [105]

आत्मयोनिः स्वयंजातो वैखानः सामगायनः ।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः [106]

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः [107]

**श्री सर्वप्रहरणायुध ओम् नम इति**

वनमाली गदी शार्ङ्गी शङ्खी चक्री च नन्दकी ।
श्रीमान् नारायणो विष्णुर्वासुदेवोऽभि रक्षतु ॥

**वनमाली ...... वनमाली ......**

## श्रीवासुदेवोऽभिरक्षतु ओं नम इति

## फलश्रुति श्लोकाः

इतीदं कीर्तनीयस्य केशवस्यमहात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेणप्रकीर्तितम् [1]

यइदं शृणुयान्नित्यं यश्चापि परि कीर्तयेत् ।
नाशुभं प्राप्नुयात्किञ्चित्सोऽमुत्रेहच मानवः [2]

वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रःसुखमवाप्नुयात् [3]

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थीचार्थमाप्नुयात् ।
कामानवाप्नुया त्कामी प्रजार्थीचाप्नुयात्प्रजाः [4]

भक्तिमान् यः सदोत्थाय शुचिस्तद्गत मानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् [5]

यशः प्राप्नोति विपुलं ज्ञाति प्राधान्य मेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् [6]

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः [7]

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येतबन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्नआपदः [8]

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः [9]

वासुदेवाश्रयो मर्त्योवासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्मसनातनम् [10]

न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधि भयंनैवोपजायते [11]

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मा सुखक्षान्ति श्रीधृति स्मृतिकीर्तिभिः [12]

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानांपुरुषोत्तमे [13]

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानिमहात्मनः [14]

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेदं कृष्णस्यसचराचरम् [15]

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च [16]

सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचरप्रभवो धर्मो धर्मस्य प्रभुरच्युतः [17]

ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् [18]

योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् [19]

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रीन्लोकान्व्याप्यभूतात्मा भुङ्क्तेविश्वभुगव्ययः[20]

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च [21]

विश्वेश्वरमजं देवं जगतः प्रभमव्ययम् ।
भजन्तिये पुष्कराक्षं न ते यान्तिपराभवम् [22]

**नतेयान्ति पराभवम् ओंनम इति**

**अर्जुन उवाच**

पद्मपत्रविशालाक्ष पद्मनाभसुरोत्तम ।
भक्तानामनुरक्तानां त्राता भव जनार्दन ॥

**श्रीभगवानुवाच**

यो मां नामसहस्रेण स्तोतुमिच्छति पांडव ।
सोऽहमेकेन श्लोकेन स्तुत एव न संशयः ॥

**स्तुतएव न संशय ओंनम इति**

**व्यास उवाच**

वासनाद्वासुदेवस्य वासितं ते जगत्त्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥

**श्री वासुदेव नमोऽस्तुत ओं नम इति**

**पार्वत्युवाच**

केनोपायेन लघुना विष्णोर् नामसहस्रकम् ।
पठ्यते पंडितैर्नित्यं श्रोतुमिच्छाम्यहम् प्रभो ॥

**ईश्वर उवाच**

श्रीराम राम रामेति रमे रामे मनोरमे ।
सहस्र नाम तत्तुल्यम् रामनाम वरानने ॥

**श्रीराम राम .....श्रीराम राम ..........**

**श्री रामनाम वरानन ओं नम इति**

**ब्रह्मोवाच**

नमोस्त्वनन्ताय सहस्र मूर्तये
सहस्र पादाक्षि शिरोरु बाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटी युगधारिणे नमः ॥.

**सहस्रकोटी युगधारिण ओं नम इति**

**सञ्जय उवाच**

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्–मतिर् मम ॥

**श्रीभगवानुवाच**

अनन्याश्चिन्तयन्तोमां येजनाःपर्यु पासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म संस्थापनार्थाय संभवामि युगे युगे ॥

आर्ता विषण्णाश्शिथिलाश्चभीता:
घोरेषुच व्याधिषु वर्तमाना: ।
संकीर्त्य नारायण शब्दमात्रं
विमुक्त दु:खा: सुखिनो भवन्ति ॥



हरि: ओं तत् सत् इति श्री महाभारते शतसहस्रिकायां
संहितायां वैयाशिक्यां आनुशाशिक पर्वणि श्रीभीष्म युधिष्टिर
संवादे श्रीविष्णोर्दिव्य सहस्रनाम स्तोत्रं नाम
एकोनपंचाशतधिक द्विशततमोऽध्याय:

**श्रीविष्णोर्दिव्य सहस्रनाम स्तोत्रं संपूर्णम्**





# श्री लक्ष्म्यष्टोत्तर शतनाम स्तोत्रं

# श्री लक्ष्म्यष्टोत्तर शतनाम स्तोत्रं

## देव्युवाच

देवदेव महादेव त्रिकालज्ञ महेश्वर।
करुणाकर देवेश भक्तानुग्रह कारक॥

अष्टोत्तर शतं लक्ष्म्याः ।
श्रोतुमिच्छमि तत्वतः ॥

## ईश्वर उवाच

देवि साधु महाभागे महाभाग्य प्रदायकं ।
सर्वैश्वर्यकरं पुण्यं सर्व पाप प्रणाशनं [1]

सर्व दारिद्र्य शमनं श्रवणाद्भुक्ति मुक्तिदं ।
राजवश्यकरं दिव्यं गुह्याद्गुह्यतरं परं [2]

दुर्लभं सर्व देवानां चतुष्षष्टिकळास्पदं ।
पद्मादीनां वरान्तानां निधीनां नित्यदायकं [3]

समस्तदेव संसेव्य  मणिमाध्यष्ट सिद्धिदं ।
किमत्र बहुनोक्तेन  देवी प्रत्यक्षदायकं [4]

तव प्रीत्याद्य वक्ष्यामि समाहित मनाः श्रुणु ।
अष्टोत्तर शतस्यास्य  महालक्ष्मीस्तु देवता [5]

क्लीं बीजपदमित्युक्तं शक्तिस्तु भुवनेश्वरी ।
अङ्गन्यासः करन्यासः स  इत्यादि प्रकीर्तितः [6]

## ध्यानं

वन्देपद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां ।
हस्ताभ्यामभय प्रदां  मणिगणैर्नानाविधैर्भूषितां[1]

भक्ताभीष्टफलप्रदां  हरिहर ब्रह्मादिभिःसेवितां ।
पार्श्वेपङ्कज शङ्ख पद्मनिधिभिर्युक्तां सदा शक्तिभिः [2]

सरसिजनयने सरोज हस्ते धवळ तरां शुक गन्धमाल्य शोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीदमह्यं [3]

प्रकृतिं विकृतिं विद्यां सर्वभूत हितप्रदां ।
श्रद्धां विभूतिं सुरभिं नमामि परमात्मिकां [4]

वाचंपद्मालयां पद्मांशुचिं स्वाहांस्वधां सुधां।
धन्यां हिरणमयीं लक्ष्मीं नित्यपुष्टां विभावरीं [5]

अदितिंचदितिं दीप्तां  वसुधां वसुधारिणीं ।
नमामि कमलां कान्तां  कामां क्षीरोदसम्भवां [6]

अनुग्रहप्रदां  बुध्धिमनघां हरिवल्लभां ।
अशोकाममृतां दीप्तां लोकशोकविनाशिनीं [7]

नमामि धर्मनिलयां करुणां लोकमातरं ।
पद्मप्रियां पद्म हस्तां पद्माक्षीं पद्मसुन्दरीं [8]

पद्मोद्भवां पद्ममुखीं  पद्मनाभ प्रियां रमां ।
पद्ममाला धरां देवीं पद्मिनीं पद्मगन्धिनीं [9]

पुण्यगन्धां सुप्रसन्नां प्रसादाभि मुखीं प्रभां ।
नमामि चन्द्रवदनां चन्द्रां चन्द्रसहोदरीं [10]

चतुर्भुजां चन्द्ररूपामिन्दिरामिन्दु शीतलां ।
आह्लाद जननीं पुष्टिं शिवां शिवकरीं सतीं [11]

विमलां विश्वजननीं पुष्टिं दरिद्य नाशिनीं ।
प्रीतिपुष्करिणीं शान्तां शुक्लमाल्याम्बरां श्रियं [12]

भास्करीं बिल्वनिलयां वरारोहां यशस्विनीं ।
वसुन्दरामुदराङ्गां हरिणीं हेममालिनीं [13]

धनधान्यकरीं सिद्धिं स्त्रैणसौम्यां शुभप्रदां ।
नृपवेश्मगतानन्दां वरलक्ष्मीं वसुप्रदां [14]

शुभां हिरण्यप्राकारां समुद्र तनयां जयां ।
नमामि मङ्गळां देवीं विष्णुवक्षःस्थलस्थितां [15]

विष्णुपत्नीं प्रसन्नाक्षीं नारायण समाश्रितां ।
दारिद्य ध्वंसिनीं देवीं सर्वोपद्रववारिणीं [16]

नवदुर्गा महालक्ष्मीं ब्रह्मरुद्रेन्द्र सेवितां ।
त्रिकालज्ञानसंपन्नां नमामि भुवनेश्वरीं [17]

लक्ष्मीं क्षीरसमुद्रराज तनयां श्रीरङ्गधामेश्वरीं ।
दासीभूत समस्तदेववनितां लोकैकदीपङ्कुरां ॥
श्रीमन्मन्द कटाक्षलब्दविभव ब्रह्मेन्द्र गंगाधरां ।
त्वां त्रैलोक्य कुटुंबिनीं सरसिजांवन्दे मुकुन्द प्रियां [18]

लक्ष्मींक्षीरसमुद्रराज..........

मातर्नमामि कमले कमलायताक्षि ।
श्री विष्णुहृत्कमल वासिनि विश्वमातः ॥
क्षीरोदजे कमलकोमल गर्भ गौरि ।
लक्ष्मी! प्रसीद सततं नमतां शरण्ये ॥ [19]

मातर्नमामि कमले............

## फलश्रुति श्लोकाः

त्रिकालं यो जपेद्विद्वान् षण्मासं विजितेन्द्रियः ।
दारिद्य ध्वंसनं कृत्व श्रियमाप्नोत्ययत्नतः [1]

देवीनाम सहस्रेषु पुण्यमष्टोत्तरं शतं ।
येन श्रियमवाप्नोति कोटि जन्मदरिद्रतः [2]

भृगुवारे शतं धीमान् पठेद्वत्सर मात्रकं ।
अष्टैश्वर्य मवाप्नोति कुबेर इव भूतले [3]


दारिद्य मोचनं नाम स्तोत्रमम्बापरं शतं ।
येनश्रिय मवाप्नोति दरिद्रः कोटिजन्मसु [4]

भुक्त्वातु विपुलान्भोगा नस्याः –
सायुज्य माप्नुयात् ।

प्रातःकाले पठेन्नित्यं सर्वदुखोपशान्तये ।
पठंस्तु चिन्तये द्देवीं सर्वाभरण भूषितां [5]

**।।इति श्री लक्ष्म्यष्टोत्तर शतनाम स्तोत्रं संपूर्णं।।**





# श्री महालक्ष्म्यष्टकं

श्रीः

# श्री महालक्ष्म्यष्टकं

नमस्तेस्तु महामाये श्रीपीठे सुर पूजिते ।
शङ्ख चक्र गदा हस्ते महालक्ष्मी नमोस्तुते [1]

नमस्ते गरुडारूढे कोलासुर (डोलासुर) भयंकरि ।
सर्वपापहरे देवि महालक्ष्मी नमोस्तुते [2]

सर्वङ्ने सर्ववरदे सर्वदुष्ट भयं करि ।
सर्व दुःख हरे देवि महालक्ष्मी नमोस्तुते [3]

सिद्धि बुद्धि प्रदे देवि भुक्ति मुक्ति प्रदायिनि ।
मन्त्रमूर्ते महादेवि महालक्ष्मी नमोस्तुते [4]

आद्यन्त रहिते देवि आद्यशक्ति महेश्वरि ।
योगङ्ने योगसंभूते महालक्ष्मी नमोस्तुते [5]

स्थूल सूक्ष्म महारौद्रे महाशक्ति महोदरे ।
महापाप हरे देवि महालक्ष्मी नमोस्तुते [6]

पद्मासन स्थिते देवि परब्रह्म स्वरूपिणि ।
परमेशि जगन्मातः महालक्ष्मी नमोस्तुते [7]

श्वेताम्बरधरे देवि नानालङ्कार भूषिते ।
जगस्थिते जगन्मातः महालक्ष्मी नमोस्तुते [8]

## फलश्रुति श्लोकाः

महा लक्ष्म्यष्टक स्तोत्रं यः पठेत् भक्तिमान् नरः ।
सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥

एककाले पठेन्नित्यं महापाप विनाशनं ।
द्विकालं यः पठेन्नित्यं धनधान्य समन्वितः ॥

त्रिकालं यः पठेन्नित्यं महाशत्रु विनाशनं ।
महालक्ष्मीर्भवे न्नित्यं प्रसन्ना वरदा शुभा ॥

**॥इति श्री महा लक्ष्म्यष्टकं संपूर्णं॥**





# श्री हयग्रीव स्तोत्रं

# श्री हयग्रीव स्तोत्रं

ज्ञानानन्दमयं देवं निर्मल स्फटिकाकृतिं ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे [1]

**ज्ञानानन्दमयंदेवं.........**

स्वतस्सिद्धं शुद्धस्फटिक मणिभूभृ त्प्रतिभटं
सुधासध्रीचीभिर्द्युतिबिरवदातत्रिभुवनं ।
अनन्तैस्त्रय्यन्तैरनुविहितहेषाहल हलं
हताशेषावद्यं हयवदन मीडीमहि महः [2]

**स्वतस्सिद्धं शुद्धस्फटिक.........**

समाहारस्साम्नां प्रतिपदमृचां धाम यजुषां
लयः प्रत्यू हानां लहरि विततिर्बोधजलधेः ।
कथादर्पक्षुभ्य त्कथककुल कोलाहल भवं
हरत्वन्तर्ध्वान्तं हयवदनहेषा हलहलः [3]

प्राची सन्ध्या काचिदन्तर्निशायाः
प्रज्ञा दृष्टेरञ्जन श्रीरपूर्वा ।
वक्त्री वेदान् भातु मे वाजिवक्त्रा
वागीशाख्या वासुदेवस्य मूर्तिः [4]

विशुद्ध विज्ञानघन स्वरूपं
विज्ञान विश्राणन बद्धदीक्षं ।
दयानिधिं देहभृतां शरण्यं
देवं हयग्रीवमहं प्रपद्ये [5]

अपौरुषेयैरपि वाक्प्रपञ्चैः
अद्यापि ते भूतिमदृष्टपारां ।
स्तुवन्नहं मुग्ध इति त्वयैव
कारुण्यतो नाथ कटाक्षणीयः [6]

दाक्षिण्यरम्या गिरिशस्य मूर्तिः
देवी सरोजासनधर्मपत्नी ।
व्यासादयोऽपिव्यपदेश्यवाचः
स्फुरन्तिसर्वे तवशक्तिलेशैः[7]

मन्दोऽभविष्यन्नियतं विरिञ्चो
वाचां निधे वञ्चित भागधेयः ।
दैत्यापनीतान् दययैव भूयोऽपि
अध्यापयिष्यो निगमान् नचेत्त्मां [8]

वितर्कडोलां व्यवधूय सत्वे
बृहस्पतिं वर्तयसे यतस्त्वं ।
तेनैव देव त्रिदशेश्वराणां
अस्पृष्ट  डोलायितमाधिराज्यं [9]

अग्नौ समिद्धार्चिषि सप्ततन्तोः
आतस्थिवान्  मन्त्रमयं शरीरं ।
अखण्ड सारैर्हविषां प्रदानैः
आप्यायनं  व्योमसदां विधत्से [10]

यन्मूलमीदृक् प्रतिभाति तत्वं
यामूलमाम्नाय महाद्रुमाणां ।
तत्वेन जानन्ति विशुद्ध सत्वाः
त्वामक्षरामक्षरमातृकां ते [11]

अव्याकृताद् व्याकृत वानसि त्वं
नामानि रूपाणि च यानि पूर्वं ।
शंसन्ति तेषां चरमां प्रतिष्टां
वागीश्वर त्वां त्वदुपज्ञवाचः [12]

मुग्धेन्दु निष्यन्द विलोभनीयां
मूर्तिं तवानन्द सुधा प्रसूतिं ।
विपश्चितश्चेतसि भावयन्ते
वेलामुदारामिव दुग्धसिन्धोः [13]

मनोगतं पश्यति यः सदा त्वां
मनीषिणां मानस राजहंसं ।
स्वयं पुरोभाव विवादभाजः
किंकुर्वते तस्य गिरो यथार्हं [14]

अपि क्षणार्धं कलयन्ति ये त्वां
आप्लावयन्तं विशदैर्मयूखैः ।
वाचां प्रवाहैरनिवारितैस्ते
मन्दाकिनीं मन्दयितुं क्षमन्ते [15]

स्वामिन्  भवद्ध्यान सुधाभिषेकात्
वहन्ति धन्याः पुलकानुबन्धं ।
अलक्षिते क्वापि निरूढमूलं
अङ्गेष्विवानन्दथुमङ्कुरन्तं [16]

स्वामिन्  प्रतीचा हृदयेन धन्याः
त्वद्ध्यान चन्द्रोदय वर्धमानं ।
अमान्तमानन्द पयोधिमन्तः
पयोभिरक्ष्णां परिवाहयन्ति [17]

स्वैरानुभावास्त्वदधीन भावाः
समृद्धवीर्यास्त्वदनुग्रहेण ।
विपश्चितो नाथ तरन्ति मायां
वैहारिकीं मोहन पिञ्छिकां ते [18]

प्राङ् निर्मितानां तपसां विपाकाः
प्रत्यग्रनिश्श्रेयस संपदो मे ।
समेधिषीरंस्तव पादपद्मे
संकल्प चिन्तामणयः प्रणामाः [19]

विलुप्त मूर्धन्य लिपिक्रमाणां
सुरेन्द्र चूडापद लालितानां ।
त्वदंघ्रिराजीवरजःकणानां
भूयान्प्रसादोमयिनाथभूयात्[20]

परिस्फुरन्नूपुरचित्रभानु –
प्रकाश निर्धूत तमोनुषङ्गां ।
पदद्वयीं ते परिचिन्महेऽन्तः
प्रबोध राजीव विभातसन्ध्यां [21]

त्वत्किङ्करालंकरणोचितानां
त्वयैव कल्पान्तर पालितानां ।
मञ्जुप्रणादं मणिनूपुरं ते
मञ्जूषिकां वेदगिरां प्रतीमः [22]

संचिन्तयामि प्रतिभादशास्थान्
संधुक्षयन्तं समयप्रदीपान् ।
विज्ञान कल्पद्रुम पल्लवाभं
व्याख्यानमुद्रा मधुरंकरंते [23]

चित्ते करोमि स्फुरिताक्षमालं
सव्येतरं नाथ करं त्वदीयं ।
ज्ञानामृतोदञ्चन लम्पटानां
लीलाघटीयन्त्रमिवाश्रितानां [24]

प्रबोध सिन्धोररुणैः प्रकाशैः
प्रवाल सङ्घातमिवोद्वहन्तं ।
विभावये देव सपुस्तकं ते
वामं करं दक्षिणमाश्रितानां [25]

तमांसि भित्वा विशदैर्मयूखैः
संप्रीणयन्तं विदुषश्चकोरान् ।
निशामये त्वां नवपुण्डरीके
शरद्घने चन्द्रमिव स्फुरन्तं [26]

दिशन्तु मे देव सदा त्वदीयाः
दयातरङ्गानुचराः कटाक्षाः ।
श्रोत्रेषु पुंसाममृतं क्षरन्तीं
सरस्वतीं संश्रित कामधेनुं [27]

विशेषवित्पारिषदेषु नाथ
विदग्ध गोष्ठीसमराङ्गणेषु ।
जिगीषतो मे कवितार्किकेन्द्रान्
जिह्वाग्र सिंहासनमभ्युपेयाः [28]

त्वांचिन्तयन्  स्त्वन्मयतांप्रपन्नः
त्वामुद्गृणन्  शब्दमयेन धाम्ना ।
स्वामिन्  समाजेषु समेधिषीय
स्वच्छन्द वादाहव बद्धशूरः [29]

नानाविधानामगतिः कलानां
न चापि तीर्थेषु कृतावतारः ।
ध्रुवं तवानाथपरिग्रहायाः
नवंनवंपात्रमहं दयायाः[30]

अकम्पनीयान्यपनीति भेदैः
अलङ्कृषीरन् हृदयंमदीयं ।
शङ्काकलङ्का पगमोज्ज्वलानि
तत्वानि सम्यञ्चि तव प्रसादात् [31]

व्याख्या मुद्रां करसरसिजैः पुस्तकं शङ्खचक्रे
बिभ्रद्भिन्नस्फटिकरुचिरे पुण्डरीके निषण्णः ।
अम्लानश्रीरमृतविशदैरंशुभिः प्लावयन् मां ।
आविर्भूयादनघ महिमा मानसे वागधीशः [32]

**व्याख्या मुद्रां करसरसिजैः ..................**

वागर्थ सिद्धिहेतोः पठत हयग्रीवसंस्तुतिं भक्त्या ।
कवितार्किक केसरिणा वेङ्कटनाथेन विरचितामेतां [33]

**वागर्थ सिद्धिहेतोः .........................**

कवितार्किकसिंहाय कल्याण गुणशालिने ।
श्रीमतेवेङ्कटेशाय वेदान्तगुरवे नमः॥

**॥ इति श्रीमद्वेदान्ताचार्य विरचित हयग्रीव स्तोत्रं संपूर्णं॥**





# दशावतार स्तोत्रं

# दशावतार स्तोत्रं

देवो नः शुभमातनोतु दशधा निर्वर्तयन्  भूमिकां
रङ्गे धामनि लब्ध निर्भररसै रध्यक्षितो भावुकैः ।
यद्भावेषु पृथग्विधेष्वनुगुणान् भावान्स्वयं बिभ्रती
यद्धर्मैरिह धर्मिणी विहरते नानाकृतिर्नायिका[1]

**देवो नः शुभमातनोतु-----**

निर्मग्न श्रुति जाल मार्गण दशा दत्त क्षणैर्वीक्षणैः
अन्तस्तन्व दिवारविन्द गहनान्यौदन्वती नामपां ॥
निष्प्रत्यूह तरङ्ग रिङ्गण मिथः प्रत्यूढ पाथश्छटा
डोलारोहसदोहलंभगवतो मात्स्यंवपुः पातु नः[2]

अव्यासुर्भुवन त्रयीमनिभृतं कण्डूयनैरद्रिणा
निद्राणस्य परस्य कूर्म वपुषोनिश्वास वातोर्मयः ।
यद्विक्षेपण संस्कृतो दधिपयःप्रेङ्खोलपर्यङ्किका
नित्यारोहण निर्वृतो विहरतेदेवः सहैव श्रिया [3]

गोपायेदनिशं जगन्ति कुहना पोत्री पवित्री कृत
ब्रह्माण्डः प्रलयोर्मिघोष गुरुभिर्घोणारवै र्घुर्घुरैः ।
यद्दंष्ट्राङ्कुर कोटि गाढ घटनानिष्कम्प नित्य स्थितिः
ब्रह्मस्तम्ब मसौ दसौ भगवती मुस्तेव विश्वंभरा [4]

प्रत्यादिष्ट पुरातन प्रहरण ग्रामः क्षणं पाणिजैः
अव्यात् त्रीणि जगन्त्य कुण्ठमहिमा वैकुण्ठ कण्ठीरवः ।
यत्प्रादुर्भवनादवन्ध्य जठरा यादृच्छिकाद् वेधसां
या काचित् सहसा महासुरगृह स्थूणा पिता मह्यभूत् [5]

व्रीडा विद्ध वदान्य दानव यशो नासीरधाटी भटः
त्रैयक्षं मकुटं पुनन्नवतुनस्त्रैविक्रमोविक्रमः ।
यत्प्रस्ताव समुच्छ्रित ध्वज पटीवृत्तान्त सिद्धान्तिभिः
स्रोतोभिः सुरसिनु रष्टसु दिशासौधेषु दोधूयते [6]

क्रोधाग्निं जमदग्निपीडनभवं संतर्प यिष्यन्  क्रमात्
अक्षत्रामपि सन्ततक्ष य इमांत्रिःसप्त कृत्वः क्षितिं ।
दत्वा कर्मणि दक्षिणां क्वचनतामास्कन्द्य सिन्धुंवसन्
अब्रह्मण्य मपा करोतु भगवानाब्रह्म कीटं मुनिः [7]

पारावार पयो विशोषण कलापारीण कालानल
ज्वाला जाल विहार हारि विशिखव्यापार घोर क्रमः ।
सर्वावस्थ सकृत्प्रपन्न जनतासंरक्षणैक व्रती
धर्मो विग्रहवानधर्म विरतिं धन्वी स तन्वीत नः [8]

फक्कत्कौरव प  ण प्रभृतयः प्रास्त प्रलम्बादयः
तालाङ्कस्य तथाविधा विहृतय स्तन्वन्तु भद्राणि नः ।
क्षीरं शर्करयेव याभिरपृथग्भूताः प्रभूतैर्गुणैः
आकौमारकमस्वदन्त जगतेकृष्णस्य ताः केलयः [9]

नाथायैव नमःपदं भवतु न श्चित्रैश्चरित्रक्रमैः
भूयोभि र्भुवना न्यमूनिकुहना गोपायगोपायते।
कालिन्दी रसिकाय कालिय फणि स्फार स्फटा वाटिका
रङ्गोत्सङ्ग विशङ्क चङ्क्र मधुरापर्यायचर्या यते [10]

भाविन्या दशया भवन्निह भवध्वंसाय नः कल्पतां
कल्की विष्णु यशस्सुतः कलिकथाकालुष्यकूलंकषः ।
निःशेष क्षत कण्टकेक्षितितले धारा जलौघै ध्रुवं
धर्मं कार्तयुगं प्ररोहयतियन्निस्त्रिंश धाराधरः[11]

इच्छा मीन विहार कच्छप महा पोत्रिन्  यदृच्छा हरे
रक्षा वामन रोष राम करुणाकाकुत्थ्स हेला हलिन्  ।
क्रीडा वल्लव कल्क वाहन दशा कल्कि न्निति प्रत्यहं
जल्पन्तः पुरुषाःपुनन्ति भुवनंपुण्यौघ पण्यापणाः [12]

इच्छा मीन विहार कच्छप ----

विद्योदन्वति वेङ्कटेश्वरकवौ जातं जगन्मङ्गलं
देवेशस्य दशावतार विषयं स्तोत्रं विवक्षेत यः ।
वक्त्रे तस्य सरस्वती बहु मुखी भक्तिः परा मानसे
शुद्धिः कापि तनौ दिशासु दशसु ख्यातिः शुभा जृंभते ॥

विद्योदन्वति वेङ्कटेश्वरकवौ---.

॥ इति श्रीमद्वेदान्ताचार्य विरचित दशाव स्तोत्रं संपूर्णं॥





# न्यास दशकं

# न्यास दशकं

अहं मद्रक्षण भरो मद्रक्षण फलं तथा ।
न मम श्रीपतेरेवेत्यात्मानं निक्षिपेद् बुधः [1]

न्यस्याम्यकिञ्चनः श्रीमन्ननुकूलोऽन्य वर्जितः ।
विश्वास प्रार्थना पूर्वं आत्मरक्षा भरं त्वयि [2]

स्वामी स्वशेषं स्ववशं स्वभरत्वेन निर्भरं ।
स्वदत्त स्वधियास्वार्थं स्वस्मिन्न्यस्यति मां स्वयं [3]

श्रीमन्नभीष्ट वरद त्वामस्मि शरणं गतः ।
एतद्देहावसाने मां त्वत्पादंप्रापय स्वयं [4]

त्वच्छेषत्वे स्थिर धियंत्वत्प्राप्त्येक प्रयोजनं ।
निषिद्ध काम्य रहितं कुरु मां नित्य किङ्करं [5]

देवी भूषण हेत्यादि जुष्टस्य भगवंस्तव ।
नित्यं निरपराधेषु कैंकर्येषु नियुङ्क्ष्वमां [6]

मां मदीयं च निखिलंचेतनाचेतनात्मकं ।
स्वकैंकर्योप करणं वरद स्वीकुरु स्वयं [7]

त्वदेकरक्ष्यस्य मम त्वमेव करुणाकर ।
नप्रवर्तय पापानि प्रवृत्तानि निवर्तय [8]

अकृत्यानां च करणं कृत्यानां वर्जनं च मे ।
क्षमस्व निखिलं देव प्रणतार्तिहर प्रभो [9]

श्रीमान्  नियत पञ्चाङ्गं मद्रक्षण भरार्पणं ।
अचीकरत् स्वयं स्वस्मिन्नतोऽहमिह निर्भरः [10]

संसारावर्त वेग प्रशमन शुभकृ द्देशिक प्रेक्षितोऽहं ।
संत्यक्तोऽन्यै रुपायैरनुचितचरितो ष्वद्यशान्ताबि सन्धिः॥
निःशङ्कस्तत्वदृष्ट्या निरवधिकदयं प्रार्थ्य संरक्षकं त्वां ।
न्यस्य त्वत्पादपद्मे वरद निजभरं निर्भरो निर्भयोऽस्मि ॥

॥ इति श्रीमद्वेदान्ताचार्य विरचित न्यासदशकं संपूर्णं॥





# विघ्नेश्वर प्रार्थना

# विघ्नेश्वर प्रार्थना

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशान्तये [1]

अगजानन पद्मार्कं गजानन महर्निशं ।
अनेकदन्तं भक्तानां एकदन्तमुपास्महे [2]

यं ब्रह्म वेदान्तविदो वदन्ति परे प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरंवा तस्मै नमो विघ्नविनायकाय [3]

एकदन्तं महाकायं तप्तकांचन सन्निभं ।
लम्बोदरं विशालाक्षं वन्देऽहं गणनायकं [4]

मौञ्जी कृष्णाजिनधरं नाग यज्ञोपवीतिनं ।
बालेन्दु शकलं मौळौ वन्देऽहं गणनायकं [5]

चित्ररत्न विचित्राङ्ग चित्रमाला विभूषितं ।
कामरूपधरं देवं वन्देऽहं गणनायकं [6]

मूषकोत्तममारुह्य देवासुर महाहवे ।
योद्धुकामं महावीर्यं  वन्देऽहं गणनायकं [7]

गजवक्त्रं सुरश्रेष्ठं कर्णचामर भूषितं ।
पाशांकुशधरं देवं वन्देऽहं गणनायकं [8]

यक्षकिन्नर गन्धर्व सिद्धविद्याधरै स्सदा।
स्तूयमानं महाबाहुं वन्देऽहं गणनायकं [9]

अम्बिकाहृदयानंदं मातृभिः परिवेष्टितं ।
भक्तप्रियं मदोन्मत्तं वन्देऽहं गणनायकं [10]

सर्वविघ्नकरंदेवं सर्वविघ्न विवर्जितं ।
सर्वसिद्धिप्रदातारं वन्देऽहं गण नायकं [11]

मूषकवाहन मोदकहस्त चामरकर्ण विलम्बितसूत्र ।
वामनरूप महेश्वर पुत्र विघ्नविनायक पादनमस्ते [12]

गजाननं भूतगणाधिसेवितं
कपित्थ जम्बूफलसार भक्षणं ।
उमासुतं शोकविनाशकारणं
नमामि विघ्नेश्वर पादपङ्कजं [13]

गणाष्टकमिदंपुण्यं यःपठेत्सततं नरः ।
सिद्ध्यन्ति सर्वकार्याणि विद्यावान्  धनवान्  भवेत् [14]





# सरस्वती प्रार्थना


# सरस्वती प्रार्थना

सरस्वती नमस्तुभ्यं वरदे कामरूपिणी ।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा [1]

पद्मपत्र विशालाक्षी पद्म केसरवर्णिनी ।
नित्यं पद्मालयादेवी सा मांपातु सरस्वती [2]

याकुंदेन्दु तुषारहारधवळा  याशुभ्र वस्त्रान्विता
यावीणा वरदण्डमण्डितकरा या श्वेत पद्मासना ।
याब्रह्माच्युत शङ्कर प्रभृतिभिर्देवै स्सदा पूजिता
सामांपातु सरस्वती भगवती निश्शेषजाड्यापहा [3]






# वाल्मीकी प्रार्थना

कूजन्तं राम रामेति मधुरं मधुराक्षरं ।
आरुह्य कविता शाखां वन्दे वाल्मीकि कोकिलं [1]

वाल्मीकेर्मुनिसिंहस्य कविता वनचारिणः ।
शृण्वन् रामकथानादं कोनयाति परांगतिं [2]

यः पिबन् सततं राम चरितामृत सागरं ।
अतृप्तप्तं मुनिं वन्दे प्राचेतस मकल्मषं [3]



# श्री आञ्जनेय स्तोत्रं

# श्री आञ्जनेय स्तोत्रं

गोष्पदी कृत वाराशिं  मशकीकृत राक्षसम् ।
रामायण महामाला  रत्नं वन्देऽनिलात्मजम् ॥

अञ्जनानंदनं वीरं  जानकी शोकनाशनं ।
कपीश मक्षहंतारं वंदे लंकाभयंकरम् ॥

जितं भगवता तेन हरिणा लोकधारिणा ।
अजेन विश्वरूपेण निर्गुणेन गुणात्मना ॥

बुद्धिर्बलं यशोधैर्यं निर्भयत्वं अरोगता
अजाड्यं वाक्पुठस्तंचैव हनूमत्स्मरणाद्भवेत् ।
लाभस्तेषां यशस्तेषां  कुतस्तेषां पराभवः
येषामिन्दीवरदळश्यामो हृदये सुप्रतिष्ठितः ॥

यत्र यत्र रघुनाथ कीर्तनं
तत्र तत्र कृतमस्तकाञ्जलिम् ।
भाष्पवारि परिपूर्ण लोचनं
मारुतिं नमत राक्षसान्तकम् ॥





# पञ्चायुध स्तोत्रं

# पञ्चायुध स्तोत्रं

स्फुरत्सहस्रार शिखातितीव्रं
सुदर्शनं भास्करकोटितुल्यं ।
सुरद्विषां प्राणविनाशि विष्णोः
चक्रं सदाऽहं शरणं प्रपद्ये [1]

विष्णोर्मुखोत्थानिल पूरितस्य
यस्य ध्वनिर्दानवदर्प हन्ता ।
तं पांचजन्यं शशिकोटिशुभ्रं
शंखं सदाऽहं शरणं प्रपद्ये [2]

हिरण्मयीं मेरुसमान सारां
कौमोदकीं दैत्यकुलैक हन्त्रीं ।
वैकुण्ठ वामाग्र कराभिमृष्टां
गदां सदाऽहं शरणं प्रपद्ये [3]

रक्षोऽसुराणां कठिनोग्र कण्ठ
च्छेदक्षरच्छोणितदिग्धधारं ।
तं नन्दकं नाम हरेः प्रदीप्तं
खड्गं सदाऽहं शरणं प्रपद्ये [4]

यज्ज्या निनाद श्रवणात्सुराणां
चेतांसि निर्मुक्त भयानि सद्यः ।
भवन्ति दैत्याऽशनि बाण वर्षि
शार्ङ्गं सदाऽहं शरणं प्रपद्ये [5]

इमं हरेः पंचमहायुधानां
स्तवं पठेद्योऽनुदिनं प्रभाते ।
समस्तदुःखानिभयानि सद्यः
पापानि नश्यन्ति सुखानि सन्ति [6]

वने रणे शत्रुजलाग्नि मध्ये
यदृच्छयापत्सु महा भयेषु ।
इदं पठन्  स्तोत्र मनाकुलात्मा
सुखी भवेत्तत्कृत सर्वरक्षः [7]




Sri Kesava
Sri Narayana
Sri Madhava
Sri Govinda
Sri Vishnu
Sri Madhusudana
Sri Trivikrama
Sri Vamana
Sri Sridhara
Sri Hrishikesa
Sri Padmanabha
Sri Damodara

# द्वादश नाम पञ्जरं

# द्वादश नाम पञ्जरं

पुरस्तात् केशवः पातु चक्री जांबूनद प्रभः ।
पश्चान्नारायणः शंखी नीलजीमूत सन्निभः [1]
इन्दीवरदल श्यामो माधवोर्ध्वं गदाधरः ।
गोविन्दो दक्षिणे पर्श्वे धन्वी चन्द्रप्रभो महान्  [2]
उत्तरे हलभृद्विष्णुः पद्मकिं जल्प सन्निभः ।
आग्नेय्या मरविन्दाभो मुसली मधुसूदनः [3]
त्रिविक्रमः खड्गपाणिर्निऋत्यां ज्वलनप्रभः ।
वायव्यां वामनो वजी तरुणादित्य दीप्तिमान्  [4]
ऐशान्यां पुण्डरीकाक्षः श्रीधरः प  सायुधः ।
विद्युत्प्रभो हृषीकेशः स बाह्यां  दिशि मुद्गरी [5]
हृत्पद्मे पद्मनभो मे सहस्रार्क सम प्रभः ।
सर्वायुधः सर्वशक्तिः सर्वज्ञः सर्वतोमुखः [6]
इन्द्रगोपकसंकाशः पाशहस्तो ऽपराजितः ।
स बाह्याभ्यन्तरं देहं व्याप्य दामोदरः स्थितः [7]
एवं सर्वत्र मच्छिद्रं नामद्वादश पं  जरं ।
प्रविष्टोऽहं न मे किं चिद्भयमस्ति कदाचन [8]

**॥भयं नास्ति कदाचन ओं नम इति॥**

आपदामपहर्तारं दातारं सर्वसंपदां ।
लोकाभिरामं श्रीरामं भूयोभूयो नमाम्यहं [9]

**आपदामपहर्तारं -----**

आर्तानामार्तिहन्तारं भीतानां भीतिनाशनं ।
द्विषतां कालदण्डं  तं रामचन्द्रं नमाम्यहं [10]

नमः कोदण्डहस्ताय सन्धीकृत शराय च ।
खण्डिताखिल दैत्याय रामायापन्निवारिणे [11]

रामायरामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः [12]

**रामायरामभद्राय------**

अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ ।
आकर्ण पूर्ण धन्वानौ रक्षेतां रामलक्ष्मणौ [13]

**अग्रतः पृष्ठतश्चैव ----------**

सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन्ममाग्रतो नित्यं रामः पातु सलक्ष्मणः [14]

अच्युतानन्त गोविन्द नामोच्चारण भेषजात् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहं [15]

**अच्युतानन्त गोविन्द-----**

सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते ।
वेदाच्छास्त्रं परं नास्ति न दैवं केशवात् परं [16]

शरीरे जर्झरीभूते व्याधिग्रस्ते कळेबरे ।
औषधं जाह्नवीतोयं  वैद्यो नारायणो हरिः [17]

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणस्सदा [18]

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृतेःस्वभावात् ।
करोमियद्यत् सकलं परस्मै
श्रीमन् नारायणायेति समर्पयामि [19]

यदक्षरपदभ्रष्टं मात्रा हीनन्तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥
विसर्ग बिन्दु मात्राणिपद पादाक्षराणिच ।
न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम [20]





# श्री नृसिंहाष्टोत्तर शतनामस्तोत्रं

# श्री नृसिंहाष्टोत्तर शतनामस्तोत्रं

श्री नृसिंहो महासिंहो दिव्यसिंहो महाबलः ।
उग्रसिंहो महादेव उपेन्द्र श्चाग्निलोचनः [1]

रौद्र श्शौरिर्महावीर स्सुविक्रम पराक्रमः ।
हरिकोलाहलश्चक्री विजयश्च जयोऽव्ययः [2]

दैत्यान्तकः परब्रह्माप्यघोरो घोर विक्रमः ।
ज्वालामुखो ज्वाल माली महाज्वालो महाप्रभुः [3]

निटिलाक्ष स्सहस्राक्षो दुर्नरीक्ष्यः प्रतापनः ।
महादंष्ट्रायुधः प्राज्ञो हिरण्यकनिषूदनः [4]

चण्डकोपी सुरारिघ्न स्सदार्तिघ्न स्सदाशिवः ।
गुणभद्रो महाभद्रो बल भद्र स्सुभद्रकः [5]

कराळो विकराळश्च विकर्ता सर्वकर्तृकः ।
भैरवाडंबरो दिव्यश्चागम्य स्सर्वशत्रुजित् [6]

अमोघास्त्र श्शस्त्रधरो हव्यकूट स्सुरेश्वरः ।
सहस्रबाहुर्वज्रनखस्सर्वसिद्धिर्जनार्दनः [7]

अनन्तो भगवान् स्थूलश्चागम्यश्च परावरः ।
सर्वमन्त्रैक रूपश्च सर्वयन्त्र विदारणः [8]

अव्ययः परमानन्दः कालजित् खग वाहनः ।
भक्तातिवत्सलोऽव्यक्त स्सुव्यक्त स्सुलभ स्सुचिः [9]

लोकैकनायकस्सर्वश्शरणागतवत्सलः ।
धीरोधरश्च सर्वज्ञो भीमो भीम पराक्रमः [10]

देवप्रियोनुतः पूज्यो भवहृत् परमेश्वरः ।
श्रीवत्सवक्षः श्रीवासो विभुस्संकर्षणः प्रभुः [11]

त्रिविक्रमस्त्रिलोकात्मा  काल स्सर्वेश्व रेश्वरः ।
विश्वंभरः स्थिराभार्यश्चाच्युतः पुरुषोत्तमः [12]

अधोक्षजोऽक्षयः सेव्यो वनमाली प्रकम्पनः ।
गुरुर्लोकगुरुःस्राष्टा परंज्योतिः परायणः [13]

ज्वालाहोबिल मालोल क्रोढ कारञ्ज भार्गवाः ।
योगानन्दश्छत्रवटः पवना नवमूर्तयः [14]

॥इति श्री नृसिंहाष्टोत्तरशतनाम स्तोत्रं संपूर्णं॥





# श्री कृष्णाष्टकं

# श्री कृष्णाष्टकं

वसुदेव सुतं देवं कंस चाणूर मर्दनम् ।
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् [1]

अतसीपुष्प सङ्काशं हारनूपुर शोभितम् ।
रत्नकङ्कण केयूरं कृष्णं वन्दे जगद्गुरुम् [2]

कुटिलालक संयुक्तं पूर्ण चन्द्रनिभाननम् ।
विलसत्कुण्डल धरं कृष्णं वन्दे जगद्गुरुम् [3]

मन्दार गन्धसंयुक्तं चारुहासं चतुर्भुजम् ।
बर्हि पिञ्छाव चूडाङ्गं कृष्णं वन्दे जगद्गुरुम् [4]

उत्पुल्ल पद्म पत्राक्षं नीलजीमूत सन्निभम् ।
यादवानां शिरोरत्नं कृष्णं वन्दे जगद्गुरुम् [5]

रुक्मिणी केळिसंयुक्तं पीताम्बर सुशोभितम् ।
अवाप्त तुलसीगन्धं कृष्णं वन्दे जगद्गुरुम् [6]

गोपिकानां कुचद्वन्द्व कुङ्कुमाङ्कित वक्षसम् ।
श्रीनिकेतं महेष्वासं कृष्णं वन्दे जगद्गुरुम् [7]

श्रीवत्साङ्कं महोरस्कं वनमाला विराजितम् ।
शंख चक्रधरं देवं कृष्णं वन्दे जगद्गुरुम् [8]

कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
कोटि जन्म कृतं पापं सद्य एव विनश्यति ..

॥इति श्री कृष्णाष्टकम् संपूर्णम्॥



# श्री सुदर्शनाष्टकं

# श्री सुदर्शनाष्टकं

प्रतिभट श्रेणि भीषण वर गुण स्तोम भूषण ।
जनिभय स्थान तारण जगदवस्थान कारण ॥
निखिल दुष्कर्म कर्शन निगम सद्धर्म दर्शन ।
जय जय श्री सुदर्शन जय जय श्री सुदर्शन [1]

शुभ जगद्रूप मण्डन सुर गण त्रास खण्डन ।
शत–मख ब्रह्म वन्दित शत–पथ ब्रह्म नन्दित ॥
प्रथित विद्वत्सपक्षित भजदहिर्बुध्न्य लक्षित ।
जय जय श्री सुदर्शन जय जय श्री सुदर्शन[2]

स्फुट तटिज्जाल पिञ्जर पृथुतर ज्वाल पञ्जर ।
परिगत प्रत्न विग्रह परिमित प्रज्ञ दुर्ग्रह ॥
प्रहरण ग्राम मण्डित परिजनत्राण पण्डित ।
जय जय श्री सुदर्शन जय जय श्री सुदर्शन [3]

निज पद प्रीत सद्गुण निरुपधि स्फीत षड्गुण ।
निगम निर्व्यूढ वैभव निज पर व्यूह वैभव ॥
हरि हय द्वेषि दारण हर पुर प्लोष कारण ।
जय जय श्री सुदर्शन जय जय श्री सुदर्शन[4]

दनुज विस्तार कर्तन जनि तमिस्रा विकर्तन ।
दनुज विद्या निकर्तन भजदविद्या निवर्तन ॥
अमर दृष्ट स्व विक्रम समर जुष्ट भ्रमि क्रम ।
जय जय श्री सुदर्शन जय जय श्री सुदर्शन [5]

प्रतिमुखालीढ बन्धुर पृथु महा हेति दन्तुर ।
विकट माया बहिष्कृत विविध माला परिष्कृत ॥
पृथु महायन्त्र तन्त्रित दृढ दया तन्त्र यन्त्रित ।
जय जय श्री सुदर्शन जय जय श्री सुदर्शन[6]

महित संपत्सदक्षर विहित संपत्षडक्षर ।
षडर चक्र प्रतिष्टित सकल तत्व प्रतिष्टित ॥
विविध सङ्कल्प कल्पक विबुध सङ्कल्प कल्पक ।
जय जय श्री सुदर्शन जय जय श्री सुदर्शन [7]

भुवन नेतस्त्रयीमय सवन तेजस्त्रयीमय ।
निरवधि स्वादु चिन्मय निखिल शक्ते जगन्मय ॥
अमित विश्व क्रियामय शमित विष्वग्भयामय ।
जय जय श्री सुदर्शन जय जय श्री सुदर्शन [8]

द्विचतुष्कमिदं प्रभूत सारं पटतां वेङ्कटनायक प्रणीतं ।
विषमेऽपि मनोरथः प्रधावन् नविहन्येत रथाङ्गधुर्यगुप्तः ॥

॥ इति श्रीमद्वेदान्ताचार्य विरचित सुदर्शनाष्टकं संपूर्णं॥





# दशावतार श्लोकं

# दशावतार श्लोकं

रामहरे, कृष्णहरे, तवनाम वदामि सदानृहरे ।
रामस्मरणा धन्यो पायं नहिपस्यामो भवतरणे ॥

वेदोद्धार विचारमते । सोमुखदानव संहरते ।
मीनाकार शरीरनमो । भक्तंते परिपालयमां ॥

रामहरे [1]

मंदाराचल दारुणहेतो । देवासुर परिपाल विभो ।
कूर्माकार शरीरनमो । भक्तंते परिपालयमां॥

रामहरे[2]

भूचोरकहर पुण्यतनो । क्रूडोद्धव भूदेवहरे ।
क्रोधाकार शरीरनमो । भक्तंते परिपालयमां ॥

राम हरे[3]

हिरण्यकश्यपु छेदनहेतो । प्रह्लादाभय दायकहेतो ।
नरसिंहाच्युतरूप नमो । भक्तंते परिपालयमां ॥

राम हरे[4]

हिरण्यकश्यपु छेदनहेतो। प्रह्लादाभय दायकहेतो।
नरसिंहाच्युत रूपनमो । भक्तंते परिपालयमां ॥

राम हरे[4अ]

भवबंधन हरविततमते। पादोदक विग दागतते।
वटुपटु वेगय नौज्वनमो। भक्तंते परिपालयमां ॥

राम हरे[5]

क्षितिपति वंशक्षयकरमूर्ते। क्षितिपति कर्ता हरमूर्ते।
भृगुकुलराम रमेशनमो। भक्तंते परिपालयमां ॥

राम हरे[6]

सीतावल्लभ दाशरथे । दशरथ नंदन लोक गुरो ।
रावण मर्दन राम नमो । भक्तंते परिपालयमां ॥

राम हरे[7]

सीतावल्लभ दाशरथे । दशरथ नंदन लोक गुरो ।
रावण मर्दन राम नमो। भक्तंते परिपालयमां ॥

राम हरे[7अ]

कृष्णानंद कृपाजलधे। कंसारे कमलेश हरे ।
बलराच्युत रूपनमो । भक्तंते परिपालयमां ॥

राम हरे[8]

कृष्णानंद कृपाजलधे। कंसारे कमलेश हरे ।
काळिय मर्दन लोक गुरो । भक्तंते परिपालयमां ॥

राम हरे[8अ]

दानवपति मानापहरा । त्रिपुर विजय मर्दनरूपा ।
बुद्धाज्ञायक बौद्धनमो । भक्तंते परिपालयमां ॥

राम हरे[9]

शिष्टजनावर दुष्टहर । खजतुरगोत्तम रामनमो ।
कलि कलि कीखर वालिनमो। भक्तंते परिपालयमां ॥




राम हरे[10]

॥श्रीरामस्सहायं॥







# शरणागति गद्यं

# शरणागति गद्यं

## ॥ श्रीमते रामानुजाय नमः ॥

यो नित्यमच्युतपदाम्बुज युग्मरुक्म
व्यामोहतस्त दितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
रामानुजस्य चरणौशरणं प्रपद्ये ॥

वन्दे वेदान्त कर्पूर चामीकरकरण्डकं
रामानुजार्यमार्याणां चूडामणि महर्निशं ॥

लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नोः
योऽसौ पुरा समजनिष्ठ जगद्धितार्थं ।
प्राच्यंप्रकाशयतुनःपरमं रहस्यं
संवाद एष शरणागतिमन्त्र सारः ॥

**॥श्री रङ्गनायिका रामानुज संवादः॥**

**श्री रामानुजः ---**

भगवन्नारायणाभिमतानुरूप स्वरूपरूप गुणविभव ऐश्वर्य शीलाद्यनवधिकातिशय असंख्येय कल्याण गुणगणां पद्मवनालयां भगवतीं श्रियं देवीं नित्यान पायिनीं निरवद्यां देवदेव दिव्य महिषीं अखिल जगन्मातरं अस्मन्मातरं अशरण्यशरण्यां अनन्य शरणः त्वत्पादारविन्दयुगळं शरणमहं प्रपद्ये ॥

पारमार्थिक भगवच्चरणारविन्दयुगळ ऐकान्तिकात्यन्तिक परभक्ति परज्ञान परमभक्तिकृत परिपूर्णानवरत नित्यविशदतम अनन्य–

प्रयोजन अनवधिकातिशयप्रिय भगवदनुभव जनित अनवधिकाति–शय प्रीतिकारित अशेषावस्थोचित अशेषशेषतैक रतिरूप नित्यकैङ्कर्य प्राप्त्यपेक्षया पारमार्थिकी भगवच्चरणारविन्द शरणागतिः यथावस्थिता अविरताऽस्तु मे ॥

**श्री रङ्गनायिका –––**

अस्तु ते । तथैव सर्वं संपत्स्यते ॥

## ॥ श्री रङ्गनाथ रामानुज संवादः ॥

**श्री रामानुजः –––**

अखिलहेय प्रत्यनीक कल्याणैकतान! स्वेतर समस्त वस्तु विलक्षण अनन्त ज्ञानानन्दैक स्वरूप! स्वाभिमतानुरूप एकरूप अचिन्त्य दिव्याद्भुत नित्य निरवद्य निरतिशय औज्ज्वल्य सौन्दर्य सौगन्ध्य सौकुमार्य लावण्य यौवनाद्यनन्त गुणनिधि दिव्यरूप!

स्वाभाविकाऽनवधिकातिशय ज्ञान बलैश्वर्य वीर्यशक्ति तेजस्सौशील्य वात्सल्य मार्दव आर्जव सौहार्द साम्य कारुण्य माधुर्य गाम्भीर्य औदार्य चातुर्य स्थैर्य धैर्य शौर्य पराक्रम सत्यकाम सत्यसङ्कल्प कृतित्व कृतज्ञताद्यसंख्येय कल्याण गुणगणौघ महार्णव!

स्वोचित विविध विचित्रानन्ताश्चर्य नित्य निरवद्य निरतिशय सुगन्ध निरतिशय सुखस्पर्श निरतिशय औज्ज्वल्य किरीट मकुट चूडावतंस मकरकुण्डल ग्रैवेयक हार केयूर कटक श्रीवत्स कौस्तुभ मुक्तादाम उदरबन्धन पीताम्बर काञ्चीगुण नूपुराद्यपरिमित दिव्यभूषण! स्वानुरूप अचिन्त्यशक्ति शङ्खचक्र गदाऽसि शार्ङ्गाद्यसंख्येय नित्य निरवद्य निरतिशय कल्याण दिव्यायुध!

स्वाभिमत नित्य निरवद्यानुरूप स्वरूप रूप गुण विभव ऐश्वर्य शीलाद्यनवधिकातिशय असंख्येय कल्याण गुणगण श्रीवल्लभ! एवंभूत भूमि नीळानायक!

स्वच्छन्दानुवर्ति स्वरूपस्थिति प्रवृत्ति भेद अशेषशेष तैकरतिरूप नित्य निरवद्य निरतिशय ज्ञान क्रियैश्वर्याद्यनन्त कल्याणगुणगण शेष शेषाशन गरुडप्रमुख नाना विध अनन्तपरिजन परिचारिका परिचरित चरणयुगळ!

परमयोगि वाङ्मनसाऽपरिच्छेद्य स्वरूपस्वभाव! स्वाभिमत विविध विचित्रानन्त भोग्य भोगोपकरण भोगस्थान समृद्ध अनन्ताश्चर्य अनन्त महाविभव अनन्त परिमाण नित्य निरवद्य निरतिशय श्रीवैकुण्ठनाथ!

स्वसङ्कल्पानुविधायि स्वरूपस्थितिप्रवृत्ति स्वशेषतैक स्वभाव प्रकृति पुरुष कालात्मक विविध विचित्रानन्त भोग्य भोक्तृवर्ग भोगोपकरण भोग स्थानरूप निखिलजगदुदय विभव लयलील!

सत्यकाम! सत्यसङ्कल्प! पर ब्रह्मभूत! पुरुषोत्तम महा विबूते! श्रीमन्! नारायण! वैकुण्ठनाथ!

अपार कारुण्य सौशील्य वात्सल्य औदार्य ऐश्वर्य सौन्दर्य महोदधे! अनालोचितविशेष अशेषलोकशरण्य! प्रणतार्तिहर! आश्रितवात्सल्यैक जलधे! अनवरतविदित निखिलभूत जात याथात्म्य! अशेष चराचर भूत निखिल नियमन निरत! अशेषचिदचिद्वस्तु शेषिभूत! निखिल जगदाधार! अखिल जगत्स्वामिन्! अस्मत्स्वामिन्! सत्य काम! सत्य सङ्कल्प! सकलेतर विलक्षण! अर्थिकल्पक! आपत्सख! श्रीमन्!

नारायण! अशरण्य शरण्य! अनन्य शरणः त्वत्पादार विन्दयुगळं शरणमहं प्रपद्ये ॥

**। अत्र द्वय(मनुसन्देयं) ।**

ओं नमो नारायणाय

श्रीमन्नारायणचरणौ शरणं प्रपद्ये
श्रीमते नारायणाय नमः

"पितरं मातरं दारान् पुत्रान्बन्धून् सखीन्गुरून्।
रत्नानि धनधान्यानिक्षेत्राणि च गृहाणि च ॥

सर्वधर्मांश्च संत्यज्य सर्वकामांश्च साक्षरान् ।
लोकविक्रान्तचरणौ शरणं तेऽव्रजं विभो! ॥ "

"त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च गुरुस्त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देवदेव ॥

**"त्वमेव माता च...."**

पिताऽसि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ! ॥ "

"तस्मात् प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यं ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं ॥ "

मनोवाक्कायैरनादिकालप्रवृत्त अनन्त अकृत्य करण कृत्याकरण भगवदपचार भागवतापचार असह्यापचार रूप नानाविध अनन्त–अपचारान्  आरब्धकार्यान्, अनारब्धकार्यान्, कृतान्, क्रियमाणान्, करिष्यमाणांश्च सर्वान्  अशेषतः क्षमस्व ।

अनादिकालप्रवृत्तविपरीतज्ञानं, आत्म विषयं, कृत्स्नजगद्विषयं च, विपरीत वृत्तंच, अशेषविषयं, अद्यापि वर्तमानं वर्तिष्यमाणं च सर्वं क्षमस्व ॥

मदीय अनादिकर्मप्रवाह प्रवृत्तां, भगवत्स्वरूप तिरोधानकरीं, विपरीत ज्ञानजननीं, स्वविषयायाश्च भोग्यबुद्धेर्जननीं, देहेन्द्रियत्वेन भोग्यत्वेन सूक्ष्मरूपेण च अवस्थितां, दैवीं गुणमयीं मायां, "दासभूतः शरणागतोऽस्मि तवास्मि दासः," इति वक्तारं मां तारय ।

"तेषांज्ञानीनित्ययुक्तः एकभक्तिर्विशिष्यते
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥

उदाराः सर्व एवैतेज्ञानी त्वात्मैव मे मतं ।
आस्थितः स हि युक्तात्मा मामेवा नुत्तमां गतिं ॥

बहूनां जन्मनामान्ते ज्ञानवान्  मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः " ॥

॥इति श्लोकत्रयोदितज्ञानिनं मां कुरुष्व॥

"पुरुषः स परः पार्थ ! भक्त्या लभ्यस्त्वनन्यया",
"भक्त्या त्वनन्यया शक्यः", "मद्भक्तिं लभते परां"

इथि स्थानत्रयोदित परभक्तियुक्तं मां कुरुष्व ।

परभक्तिपरज्ञानपरमभक्त्येकस्वभावं मां कुरुष्व ।

परभक्ति परज्ञान परमभक्तिकृत परिपूर्णानवरत नित्यविशदतम अनन्यप्रयोजन अनवधिकातिशयप्रिय भगवदनुभवोऽहं, तथाविध भगवदनुभवजनित अनवधिकातिशय प्रीतिकारित अशेषावस्थोचित अशेषशेषतैकरतिरूप नित्यकिङ्करो भवानि ।

**श्री रङ्गनाथः ----**

एवंभूत मत्कैङ्कर्यप्राप्त्युपायतया अवक्लृप्त समस्त वस्तुविहीनोऽपि, अनन्त तद्विरोधिपापाक्रान्तोऽपि, अनन्त मदपचार युक्तोऽपि, अनन्त मदीयापचार युक्तोऽपि, अनन्त असह्यापचार युक्तोऽपि, एतत्कार्य कारणभूत अनादि विपरीत अहङ्कार विमूढात्म स्वभावोऽपि , एतदुभयकार्यकारण भूत अनादि विपरीत वासनासंबद्धो ऽपि, एतदनुगुण प्रकृतिविशेष संबद्धोऽपि, एतन्मूल आध्यात्मिक आधि भौतिक आधिदैविक सुखदुःख तद्धेतु तदितरोपेक्षणीय विषयानुभव ज्ञानसंकोचरूप मच्चरणारविन्द युगळ ऐकान्तिकात्यन्तिक परभक्ति परज्ञान परमभक्तिविघ्न प्रतिहतोऽपि, येनकेनापि प्रकारेण द्वयवक्ता त्वं, केवलंमदीययैव दयया, निश्शेष विनष्ट सहेतुक मच्चरणारविन्दयुगळ ऐकान्तिकात्यन्तिक परभक्ति परज्ञान परमभक्तिविघ्नः, मत्प्रसादलब्ध मच्चरणारविन्दयुगळ ऐकान्तिका त्यन्तिक परभक्ति परज्ञान परम–भक्तिः, मत्प्रसादादेव साक्षात्कृत यथा वस्थित मत्स्वरूप रूपगुणविभूति लीलोपकरण विस्तारः, अपरोक्षसिद्ध मन्नियाम्यता मद्दास्यैकरस आत्म स्वभावात्मस्वरूपः, मदेकानु भवः, मद्दास्यैकप्रियः, परिपूर्णान वरत नित्यविशदतम अनन्यप्रयोजन अनवधिकातिशयप्रिय

मदनुभवस्त्वं तथाविध मदनुभवजनित अनवधिकातिशय प्रीतिकारित अशेषावस्थोचित अशेषशेषतैकरतिरूप नित्य किंकरो भव ।

एवंभूतोऽसि ।

आध्यात्मिक आधिभौतिक आधिदैविक दुःख विघ्नगन्धरहितस्त्वं द्वय मर्थानुसन्धानेन सह सदैवं वक्ता यावच्छ रीरपातं अत्रैव श्रीरङ्गे सुखमास्व ॥

शरीरपातसमये तु केवलं मदीययैवदयया अतिप्रबुद्धः, मामेव अवलोकयन्, अप्रच्युत पूर्वसंस्कार मनोरथः, जीर्णमिव वस्त्रं सुखेन इमां प्रकृतिं स्थूल सूक्ष्म रूपां विसृज्य, तदानीमेव मत्प्रसादलब्ध मच्चरणारविन्द युगळ ऐकान्तिका त्यन्तिक परभक्ति परज्ञान परमभक्ति कृत परिपूर्णानवरत नित्यविशदतम अनन्यप्रयोजन अनवधिकातिशयप्रिय मदनुभवस्त्वं तथाविध मदनुभवजनित अनवधिकातिशय प्रीतिकारित अशेषावस्थोचित अशेष शेष तैकरतिरूप नित्यकिङ्करो भविष्यसि ॥

मातेऽभूदत्र संशयः ।

"अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ।"
" रामो द्विर्नाभिभाषते ।"

" सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ॥"

" सर्वधर्मान्  परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्योमोक्षयिष्यामि मा शुचः ॥"

इति मयैव ह्युक्तं ।


अतस्त्वं तव तत्त्वतो मद् ज्ञानदर्शनप्राप्तिषु निस्संशयःसुखमास्व॥

अन्त्यकालेस्मृतिर्यातु तवकैङ्कर्यकारिता।
तामेनां भगवन्नद्य क्रियामाणां कुरुष्व मे ॥
एम्पेरुमानार् तिरुवडिगळे शरणं



इति श्री भगवद्रामानुज विरचिते गद्यत्रय प्रबन्धे शरणागति गद्यं॥

# सर्व श्री कृष्णार्पणमस्तु



सात्विकत्यागं

# सात्विकत्यागं

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै
श्रीमन्नारायणायेति समर्पयामि॥


कवितार्किक सिंहाय कल्याण गुणशालिने ।
श्रीमते वेङ्कटेशायवेदान्त गुरवे नमः ॥

वादिद्विप शिरोभंग पंचानन पराक्रमः ।
श्रीमान् वेङ्कट नाथार्यः चिरं विजतां भुवि ॥

यदक्षर पदब्रष्टं मात्रा हीनन्तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोस्तुते ॥
विसर्ग बिन्दु मात्राणि पद पादाक्षराणि च ।
न्यूनानिचातिरिक्तानि क्षमस्व पुरुषोत्तम ॥

कार्पण्य दोषोपहत स्वभावः
पृच्छामि त्वां धर्म सम्मूढचेताः ।
यच्छ्रेयस्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मांत्वां प्रपन्नं॥

--- सर्वं श्री कृष्णार्पणमस्तु ---



कर्पूर दीपआरति

# कर्पूर दीपआरति

श्रियः कान्ताय कल्याण निधये निधयेर्थिनां ।
श्री वेङ्कट निवासाय श्रीनिवासाय मङ्गळं ॥

तद्विष्णोः परमं पदँसदा पश्यन्ति सूरयः ।
दिवीवचक्षुराततं ।
तद्वि प्रासो विपन्यवो जाघृवागं् सस्समिन्दते ।
विष्णोर्यत् परमं पदं ।

पर्याप्त्या अनन्तरायाय
सर्व स्तोमोति रात्र उत्तम महद्भवति
सर्व स्याप्त्यै सर्वस्य जित्यै
सर्वमेव तेनाप्नोति सर्वं जयति ॥

**--- सर्वं श्री कृष्णार्पणमस्तु ---**

सर्वेजनाः सुखिनो भवन्तु
समस्तसन्मङ्गळानि सन्तु ॥



सर्वे जनाः सुखिनो भवन्तु ।

समस्त सन्मङ्गळानि सन्तु ॥


ஸர்வே ஜநா: ஸுகிநோ பவந்து
ஸமஸ்த ஸந்மங்ளாநி ஸந்து

సర్వే జనాః సుఖినో భవన్తు

సమస్త సన్మఙ్గళాని సన్తు

ಸರ್ವೇ ಜನಾಃ ಸುಖಿನೋ ಭವನ್ತು
ಸಮಸ್ತ ಸನ್ಮಙ್ಗಳಾನಿ ಸನ್ತು

sarve janāḥ sukhino bhavantu
samasta sanmaṅgaḷāni santu



Back